# ||संस्कृत व्याकरणम् ||
## -ः अनुच्छेद लेखनम् ः-
## कक्षा - VIII

### (1.) हिमालयः

हिमालयः पर्वतानां राजा मन्यते। अयं भारतवर्षस्य उत्तरस्यां दिशि अस्ति। अस्य शृङ्गाः हिमाच्छादिताः तिष्ठन्ति। हिमालये बहवः औषध्यः सन्ति। हिमालयः अस्माकं शान्तिः स्रोतरूपेण विराजते।

### (2.) गङ्गा नदी

अस्माकं देशे गङ्गानदी सर्वासु नदीषु श्रेष्ठा पवित्रतमा च अस्ति। इयं हिमालयात् प्रभवति। इयं बङ्गोपसागरे पतति। अस्याः तटे बहूनि तीर्थस्थानानि सन्ति। सभ्यता-संस्कृतिः एतस्याः कारणात् उन्नता अस्ति।

### (3.) संस्कृतभाषायाः महत्वम्

संस्कृतम् सर्वासाम् भाषाणां जननी सर्वशास्त्राणां ज्ञानम् संस्कृते एव रक्षितम् अस्ति। इयं देवभाषा कथ्यते। इयं भाषा अति पुष्टा अस्ति। अस्यां भाषायां अलभ्यानि पुस्तकानि सन्ति।

### (4.) भारतवर्षम्

भारतवर्षः अस्माकं देशः अस्ति। अयं एशिया महाद्वीपस्य दक्षिणे भागे अवस्थितः। अत्र गङ्गा, यमुना, गोदावरी, ब्रह्मपुत्राद्य नद्यः वहन्ति। अस्मिन् देशे विविधाः भाषाः प्रचलिताः सन्ति। अत्रैव राम-कृष्ण-बुद्ध-गाँधी-राजेन्द्र-नेहरू-पटेल आदयः प्रमुखाः महापुरुषाः उत्पन्नाः।

### (5.) दूरदर्शनम्

दूरदर्शनम् आधुनिकविज्ञानस्य अद्भुतः आविष्कारः वर्तते। जॉन एल० बेयर्ड महोदयेन दूरदर्शनस्य आविष्कारः कृतः। विद्युत्-तरङ्गेषु वायुप्रेरिता नालिका मार्गेण प्रक्षेपणं भवति। दूरदर्शनप्रसारणकेन्द्रात् प्रकाशः परिवर्तितं भूत्वा पटे छविकर्षणं करोति। अनेन वयं गृहे स्थित्वाऽपि संसारस्य सर्वेषां घटनानां साक्षात्कुर्मः।

—ः इति ः—

AWAASIR SANSKRIT